No. ४४२४

Title नवान्न श्राद्ध विधि:

Author ✗

Extent ५ Age ✗

Subject धर्मशास्त्रं. कृ. पद्धति

नवान्नश्राद्धविधिः
४४२४

५५२१/5

ॐ नवान्ने
यंब्रह्मेतिनमस्कृत्य
ब्राह्मणसंस्थाप्य प्रतिज्ञा· ३
वैश्वदेविकादिनिमंत्रणं
अक्रोधनैरितिपाठः ३
हस्तार्घदानं ३
सव्येनाचमन
ब्राह्मणोपवेशन
कर्मपात्रपूरणादि
पुण्डरीकाक्षस्मरण
देवताभ्येति त्रिर्जपः
नीवीबंधन
दिग्बंधन
प्रतिज्ञासंकल्प
विश्वेदेवाद्यासनं ३
विश्वेदेवादिपूजनं ३
गंधादिदानसंकल्प ३
अर्थेनविधेःपरिपूर्णकथना
चमन भस्मनामंडलीकरण ३
[redacted] परिवेषणं ३
पात्रालंभन ३
अन्नसंकल्प ३
मधुनाभिषेक
अपसव्येनाक्षय्योदकदान· ६
आशीर्ग्रहण
दक्षिणासंकल्प पितृपूर्वक
स्वस्तिवाचन स्वस्तिदाक·
विश्वपूजन
देवताभ्येति ३
पितृपूर्वब्राह्मणोत्थापन
आमावाजस्येतिक·आ·
विसर्जन नीवीविस्रंसन
आचमन यस्यस्मृत्येति
पठनम् ॐ·

ॐ श्रीगणेशाय नमः ॥ अथ नवान्ननिमित्तक संकल्पश्राद्धविधिर्लिख्यते ॥ ॐ यं ब्रह्मवेदान्तविदो वदन्ति परं प्रधानं पु
रुषं तथान्ये विश्वोद्गतेः कारणमीश्वरं वा तस्मै नमो विघ्नविनाशनाय अभिप्रेतार्थसिद्ध्यर्थं पूजितो यः सुरैरपि सर्ववि
घ्नछिदे तस्मै श्रीगणाधिपतये नमः २ शुक्लाम्बरधरं विष्णुमिति पठित्वा नमस्कृत्य ब्राह्मणान्स्थापयित्वा एतं ते
ति प्रतिष्ठाप्य ॐ भूर्भुवः स्वः वैश्वदेविक ब्राह्मण् पित्रादिमातामहादि ब्राह्मण् सुप्रतिष्ठितो भव यवान्गृहीत्वा अद्येह
अमुकगोत्रपित्रादित्रयश्राद्धसंबंधिनां तथा अमुकगोत्रमातामहादित्रयश्राद्धसंबंधिनां पुरूरवोमाद्रव संज्ञ
कानां विश्वेषां देवानां संकल्पश्राद्धे ब्राह्मण् भवान्मया निमंत्रितः निमंत्रितोस्मि अक्रोधनैः शौचपरैः सततं ब्रह्मचा
रिभिः भवितव्यं भवद्भिश्च मया च श्राद्धकारिणा सर्वायासविनिर्मुक्तैः कामक्रोधविवर्जितैः भवितव्यं भवद्भिर्नोयतने श्राद्ध
कर्मणि आगतं वः सुस्वागतं एतद्वः पाद्यमस्तु ॐ यत्फलं कपिलादाने इति पठित्वा पादपूजायां आत्रसुगंधः पत्रपुष्पाक्ष राम:
तं नमः अद्येह अद्येह अमुकगोत्र पित्रादित्रयश्राद्धसंबंधिनः तथा अमुकगोत्रमातामहादित्रयश्राद्धसंबंधिनः पुरूर १

वाईवसंज्ञक विश्वेदेवा एष पादार्घो वो नमः ततः पित्रादिब्राह्मणान्निमंत्र्य अपसव्येन तिलान्गृहीत्वा अद्येह अमुकगो
त्राणां अस्मत्पितृपितामहप्रपितामहानां अमुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां संकल्पश्राद्धे ब्र
वप २ ह्मन्भवान्मया निमंत्रितः निमंत्रितोस्मि अक्रोधनैः शौचैरित्यादि पठित्वा पादपूजां कृत्वा मातामहादिब्राह्मणान्निमंत्रयेत् नं २
अद्येह अमुकगोत्राणां मातामहप्रमातामहवृद्धप्रमातामहानां अमुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां
संकल्पश्राद्धे ब्रह्मन्भवान्मया निमंत्रितः निमंत्रितोस्मि अक्रोधनैः शौचपरैरित्यादि पठित्वा पादपूजनं कृत्वा पादार्घं गृहीत्वा
अद्येह अमुकगोत्रा अस्मत्पितृपितामहप्रपितामहा अमुकामुकशर्माणः सपत्नीकाः वसुरुद्रादित्यस्वरूपाः एष वो पादार्घः ॥
तथा अमुकगोत्रा अस्मन्मातामहप्रमातामहवृद्धप्रमातामहाः अमुकामुकशर्माणः सपत्नीकाः वसुरुद्रादित्यस्वरूपाः ए
ष वो पादार्घः ॥ इति पादार्घं दत्वा ॥ सव्येनाचम्य ब्रह्मन्नत्रोपविश्यतां । इति ब्राह्मणानुपवेश्य स्ववामभागे कर्मपात्रस्थापनं
भूमौ चंदनेन त्र्यंरवचक्रे लिखित्वा आसनं आसने पात्रं पात्रे पवित्रं पवित्रे स्थापयेत् ॐ शन्नो देवीति जलं यवोसीति यवान्
तिलोसीति तिलान् गंधाक्षतपुष्पादीनि तूष्णीं निक्षिप्य कर्मपात्रं सुसंपन्नमस्तु तेन जलेनात्मानं संकल्पश्राद्धसामग्रीं च

संप्रोक्ष्य प्राणानायम्य ॐ पुण्डरीकाक्षाय नमः ॥ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा यः स्मरेत्पुंडरीकाक्षं स बाह्याभ्यंतरः
शुचिः । ततो देवताभ्येति त्रिर्जपः ॐ देवताभ्यः पितृभ्यश्च महायोगीभ्य एव च नमः स्वाहायै स्वधायै नित्यमेव नमो नमः ॥३॥ ततः
2 सप्तव्याधा दशार्णेषु इत्यादि पठित्वा ततः नवान्नाधिकारसिध्यर्थं संकल्पश्राद्धसमारंभेन । अपसव्येन । सोमस्य नीवीरसी
तिवामकट्यां वस्त्रग्रंथौ नीवीमारोपयेत् दिग्बंधः ॐ अग्निष्वात्ताः पितृगणाः प्राचीं रक्षंतु मे दिशं तथा बर्हिषदः पांतु या
स्तया म्यां ये पितरः स्थिताः प्रतीचीमाज्यपास्तद्वदुदीचीमपि सोमपाः विदिशश्च गणाः सर्वे रक्षंतूर्ध्वमधोऽपि वा रक्षोभूतपिशाचे
भ्यस्तथैवासुरदोषतः सर्वतश्चाधिपस्तेषां यमो रक्षां करोतु मे तिला रक्षंतु दितिजान् दर्भा रक्षंतु राक्षसान् पंक्तिं वै श्रोत्रियो र
क्षेदतिथिः सर्वरक्षकः इति दिग्बंधः ॥ अपसव्येन प्रतिज्ञासंकल्पः ॥ ॐ विष्णु ३ ॐ नमः परमात्मने श्रीपुराणपुरुषोत्तमाय अद्ये
ह अमुकनामसंवत्सरे अमुकायने अमुकऋतौ अमुकमासे अमुकपक्षे अमुकतिथौ अमुकगोत्राणां अस्मत्पितृपितामहप्र रामः
पितामहानां अमुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां तथा अमुकगोत्राणां अस्मन्मातामहप्रमातामहवृद्धप्र
मातामहानां अमुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां पितृणां मक्षान्नस्यार्थं पुरूरवोमाद्रव संज्ञक वि २
नां १

श्वेदेवापूर्वकं संकल्पविधिना आमान्नेन नवान्नभोजनाधिकारसिद्ध्यर्थे संकल्पश्राद्धमहं करिष्ये कुरुष्व सायकुशेनावि
श्वेदेवा आसनं ॐ अद्येह अमुकगोत्राःस्मत्पित्रादित्रय तथा अमुकगोत्रास्मन्मातामहादित्रयश्राद्धसंबंधिना पुरूरवो
मार्द्रवसंज्ञकानां विश्वेषां देवानां इदं कुशासनमस्तु ॐ भूर्भुवःस्वः इदमासनमास्यतामासे ततः अपसव्येन तिलमो
टकं गृहीत्वा अद्येह अमुकगोत्राणां अस्मत्पितृपितामहप्रपितामहानां अमुकामुकशर्मणां सपत्नीकानां वसुरुद्रा
दित्यस्वरूपाणां इदं कुशासनमस्तु ॐ भूर्भुवःस्वः इदमासनमास्यतामासे तथा अमुकगोत्राणां अस्मन्मातामह
प्रमातामहवृद्धप्रमातामहानां अमुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां इदं कुशासनमस्तु ॐ भूर्भुवः
स्वः इदमासनमास्यतामासे इत्यासनानि दत्वा सव्येन विश्वेदेवापूजनं ॐ नमोस्त्वनंतायेति गंधाक्षतपुष्पादिभिः
संपूजयेत् अपसव्येन ॐ पितृभ्यःस्वधायिभ्येति मंत्रेण गंधादिभिः पित्रादि मातामहादिब्राह्मणौ संपूज्य पुनः
पसंकल्प सव्यं कृत्वा अद्येह अमुकगोत्रास्मत्पित्रादित्रय तथास्मअमुकगोत्रास्मन्मातामह प्रमातामह वृद्धप्रमा

नामहादित्रयश्राद्धसंबंधिनः पुरूरवोमार्द्रवसंज्ञका विश्वेदेवा ब्राह्मणार्चनविधौ इमानि गंधाक्षतपुष्पधूपादि
यथाविभागं वः स्वाहा । अपसव्यं कृत्वा अद्येह अमुकगोत्राः अस्मत्पितृपितामहप्रपितामहाः अमुकामुकशर्माणः
सपत्नीकाः वसुरुद्रादित्यस्वरूपाः तथा अमुकगोत्राः अमुकमातामहप्रमातामहवृद्धप्रमातामहाः अमुकामुकश
3 र्माणः सपत्नीकाः वसुरुद्रादित्यस्वरूपाः ब्राह्मणार्चनविधौ इमानि गंधाक्षतपुष्पधूपदीपादीनि मया दत्तानि यथावि
भागं वः स्वधा ॥ अर्चनविधेः सर्वं परिपूर्णतास्तु ॥ सव्यं विधाय ॥ अथ वम्पभस्मना वा चतुष्कोणमंडलं विधाय तदुपरि सो
पस्करं आमान्नं संस्थाप्य अधोमुखाभ्यां पाणिभ्यां ॐ मधु २ पात्रमालभ्यालभ्य पृथ्वीते पात्रं द्यौरपिधानं इति प
ठित्वा अन्नसंकल्पः अद्येह अमुकगोत्राः अस्मत्पित्रादित्रयश्राद्धसंबंधिभ्यः तथा अमुकगोत्राः अस्मन्मातामहादित्रय
श्राद्धसंबंधिभ्यः पुरूरवोमार्द्रवसंज्ञकेभ्यो विश्वेभ्यो देवेभ्यः इदमामान्नं सोदकं सोपस्करं यथाविभागं वः स्वाहा ॥ शिवः
नमो देवेभ्यः अपसव्यं कृत्वा पित्रादिब्राह्मणसमीपे उत्तानाभ्यां पाणिभ्यां ॐ मधु २ पात्रमालभ्य इति पठित्वा ३

अन्नसंकल्पः अद्येह अमुकगोत्रेभ्य अमुकपितृपितामहप्रपितामहेभ्य अमुकामुकशर्मभ्यः सपत्नीकेभ्यो वसुरु
द्रादित्यस्वरूपेभ्य इदमामान्नं सोदकं सोपस्करं यथाविभागं वः स्वधा यथासुखेन भुञ्जध्वं तथा मातामहादि ब्राह्मण
समीपे उत्तानाभ्यां पाणिभ्यां ॐ मधु३ पात्रमालभ्य इत्यादि पठित्वा अन्नसंकल्पः अद्येह अमुकगोत्रेभ्यः अमुकमा
तामह प्रमातामह वृद्धप्रमातामहेभ्यः अमुकामुकशर्मभ्यः सपत्नीकेभ्यो वसुरुद्रादित्यस्वरूपेभ्यः इदमामान्नं सोद
कं सोपस्करं यथाविभागं वः स्वधा यथासुखेन भुञ्जध्वं स्वधा पितृभ्यः। इति अन्नसंकल्पः॥ ततः सव्येन मूर्द्धाभिषेकः। मम
कुले दीर्घमायुरस्तु शान्तिरस्तु पुष्टिरस्तु वृद्धिरस्तु यच्छ्रेयस्तदस्तु यत्पापं रोगं शोकं दुःखं दारिद्र्यं तद्दूरे प्रतिहतमस्तु अ
मृताभिषेकोस्तु अपसव्यं कृत्वा अक्षय्योदकदानं॥ अद्येह अमुकगोत्रस्यामुकपितुरमुकशर्मणः सपत्नीकस्य वसु
स्वरूपस्य नवान्नश्राद्धे इदमामान्नोदकादि यद्दत्तं तदक्षय्यमस्तु अस्त्वक्षय्यं तथा अमुकगोत्रस्य अमुकपितामहस्य
अमुकशर्मणः सपत्नीकस्य रुद्रस्वरूपस्य। तथा अमुकगोत्रस्यामुकप्रपितामहस्य अमुकशर्मणः सपत्नीकस्य

आदित्यस्वरूपस्य नवान्नश्राद्धे इदमामान्नोदकादि यद्दत्तं तदक्षय्यमस्तु अस्त्वक्षय्यं तथा अद्येह अमुकगोत्रस्य अ
मुकमातामहस्य अमुकशर्मणः सपत्नीकस्य वसुस्वरूपस्य नवान्नश्राद्धे इदमामान्नोदकादि· तथा· अमुकगोत्रस्या
मुकमातामहस्यामुकशर्मणः सपत्नीकस्य रुद्रस्वरूपस्य नवान्नश्राद्धे इदमामान्नमित्यादि· तथा अमुकगोत्रस्या
मुकवृद्धप्रमातामहस्य अमुशर्मणः सपत्नीकस्य आदित्यस्वरूपस्य नवान्नश्राद्धे इदमामान्नमित्यादि· इत्यक्षय्योदकं
दत्वा सव्यं कृत्वा आशीर्ग्रहणं अघोराः पितरः संतु गोत्रं नो वर्द्धतां २ दातारो नोभिवर्द्धतां २ वेदाः वर्द्धंतां २ संततिर्वर्द्धतां २
श्रद्धा च नो मा व्यगमत् मा मा बहुदेयं च नो अस्तु २ अन्नं च नो बहु भवेत् भवतु अतिथींश्च लभेमहि लभध्वं याचितार
श्च नः संतु २ मा स्म याचिष्म कंचन इत्येता आशिषः सत्याः संतु पितृणां प्रसादेन इत्याशीर्ग्रहणं कृत्वा दक्षिणासंकल्पः
देयद्रव्यसंप्रोक्षणसंकल्प अद्येहेत्यादि अमुकगोत्राणां अमुकपितृपितामहप्रपितामहानां अमुकामुकशर्मणां सपत्नी राम:
कानां वसुरुद्रादित्यस्वरूपाणां तथा अमुकगोत्राणां अमुकमातामहप्रमातामहवृद्धप्रमातामहानां अमुकामुकश ८

मेत्तांसपत्नीकानांवसुरुद्रादित्यस्वरूपाणांपितृणांप्रसादयन्तप्तिकामनयानवान्नभोजनाधिकारसिद्ध्येपुरूरवोमाद्र्वः
संज्ञकविश्वेदेवाःपूर्वकंसंकल्यविधिनाआमान्नादिनानवान्नश्राद्धकर्मणःसांगफलप्राप्तये·साङ्गुरायार्थं इमांरजतनि
ष्क्रयिणींदक्षिणांआमान्नेनब्राह्मणायददास्ये· तथा अमुकगोत्रास्मत्पित्राद्स्मै द्वित्रयश्राद्धसंबंधिनां तथाऽमुकमात्राः
अमुकमातामहादित्रयश्राद्धसंबंधिनांपुरूरवोमाद्र्वसंज्ञकानांविश्वेषांदेवानांप्रीतयेवैश्वदेविकश्राद्धकर्मणःसाङ्गु
रायार्थं· इमांदक्षिणांब्राह्मणायददास्ये ॐतत्सन्नमम ॥स्वस्तिभवंतोब्रुवंतु ॥ॐस्वस्ति ॥स्वस्तिरस्तु ॥सम्पानुष्ठानसंप
न्नेत्यादिना ॥अथविशेषपूजनं ॥आयुःप्रजांधनंविद्यांस्वर्गंमोक्षंसुखानिच प्रयच्छंतथाराज्यंनृणांप्रीताःपितामहाःआयुःपु
त्रान्यशःस्वर्गंकीर्तिंपुष्टिंबलंश्रियं पशून्सुखंधनंधान्यंप्राप्नुयात्पितृपूजनात् इतिसंपूज्य ततोदेवताभ्येत्यादिसप्तव्याधे
त्यंतंपठित्वा एतत् श्राद्धंविसर्जयेत इदंश्राद्धंविधिहीनं· दक्षिणाहीनंवाक्यहीनंश्रद्धाहीनं प्रमादाल्लोभाद्वायद्यत्कृतंतत्सु
कृतमस्तु· तत्सर्वंश्रीविष्णोःप्रसादाद्ब्राह्मणवचनात्सर्वंपरिपूर्णमस्तु· अस्तुपरिपूर्णं ॥अपसव्येन उत्तिष्ठब्रह्मणस्पतेति
पित्रादिब्राह्मणौ सव्येनवैश्वदेविकब्राह्मणमुत्थाप्य आमावाजस्येतिमंत्रेण कर्मपात्रंभ्रामयित्वा· विसर्जयेत् ॥

नीवीं विसृज्याचम्य ॥ यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु न्यूनं संपूर्णतां याति सद्यो वंदे तमच्युतं ॐ अच्युता
य नमः ॥३॥ वैश्वदेवं कृत्वा भुंजीत ॥ ❀ ॥ इति नवान्नामावास्यादिसंकल्पश्राद्धविधिः ॥ विश्वेश्वरो गुणयुगादिशशां
कशाके मार्गे सकामकमनीयतिथौ सशुक्ले काश्यान्वितेऽर्द्दति श्राद्धविधिं हि सार्थमाधायपण्डितवरस्तो हादसं लिलेख।

5

सौ १२

१७४३

नवान्नश्राद्धविधिः ॥

शिव
५

पद्धतिः